# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा -शास्त्रीप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ७ (C.E.- 1.1.1.New) मुहूर्तचिन्तामणिः । | गुणाः - ७० |
|---|---|---|
| विषयः - ज्यौतिषशास्त्रम् ( गौण ) | | |
| दिनाङ्कः - २१/१२/२०१८ | | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

*(१) षष्ठ्यष्टमीभूतविधुक्षयेषु नो सेवेत वा तैलपले क्षुरं रतम् ।*
*नाभ्यञ्जनं विश्वदशद्विके तिथौ धात्रीफलैः स्नानममाद्रिगोष्वसत् ॥*

*(२) घटो झषो गौर्मिथुनं मेषकन्यालितौलिनः ।*
*धनुः कर्को मृगः सिंहश्चैत्रादौ शून्यराशयः ॥*

*(३) विपाशेरावतीतीरे शुतुद्रुश्चत्रिपुष्करे*
*विवाहादिशुभे नेष्टं होलिकाप्राग्दिनाष्टकम् ॥*

**प्रश्नः २ अधोलिखितयोरेकस्योपरि निबन्धं लिखत । ( १० )**

*(१) भद्राविचारः ।*

*(२) दग्धादियोगचतुष्टयम् ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

*(१) उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम् ।*
*तत्र स्थिरं बीजगेहशान्त्यारामादिसिद्धये ॥*

*(२) क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न ।*
*पौष्णाम्बुपाश्विनीवातश्रवाश्चित्राः क्रयेशुभाः ॥*

*(३) विप्राज्ञया ततोद्वाहे राज्ञा प्रीत्यार्पितं च यत् ।*
*निन्द्येऽपि धिष्ण्ये वारादौ वस्त्रं धार्यं जगुर्बुधाः ॥*

**प्रश्नः ४ अधोलिखितयोरेकस्योपरि निबन्धं लिखत । ( १० )**

*(१) अग्निवासविचारः । (२) अभुक्तमूलनिर्णयः ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

*(१) माणिक्यमुक्ताफलविद्रुमाणि गारुत्मकं पुष्पकवज्रनीलम् ।*
*गोमेदवैदूर्यकमर्कतः स्युः रत्नान्यथोज्ञष्यमुदेसुवर्णम् ॥*

(२) *आद्यं रजः शुभं माघमार्गराधेषफाल्गुने ।*

*ज्येष्ठश्रावणयोः शुक्ले सद्वारे सत्तनौ दिवा ॥*

(३) *पञ्चमासाधिके मातुर्गर्भे चौलं शिशोर्न सत् ।*

*पञ्चवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि ॥*

**प्रश्नः ६ अधोलिखितयोरेकस्योपरि निबन्धं लिखत । (१०)**

(१) *गर्भाधानविचारः ।*

(२) *लग्नशुद्धिसहितव्रतवन्धमुहूर्तविचारः ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामुत्तरं लिखत । (१०)**

(१) *मुहूर्तचिन्तामणिग्रन्थस्य रचनाकारः कः अस्ति ?*

(२) *जयातिथियः काः ?*

(३) *भद्रायाः पाताललोके फलं किम् ?*

(४) *आनन्दादियोगानां संख्यान् लिखत ।*

(५) *यदा चन्द्रः कुम्भराशौ स्यात्तदा भद्रा कुत्र भविष्यति ?*

(६) *चरसंज्ञकः वारः कः अस्ति ?*

(७) *अधोमुखनक्षत्राणां नामानि लिखत ।*

(८) *ध्रुवसंज्ञकनक्षत्राणां नामानि लिखत ।*

(९) *शनेः रत्नस्य नाम किम् ?*

(१०) *मूलनक्षत्रस्य प्रथमचरणस्य फलं किम् ?*

(११) *त्रयोदशीतिथेः स्वामी कः ?*

(१२) *भद्रातिथिनां नामानि लिखत ।*

(१३) *रोहिणीनक्षत्रस्य स्वामी कः ?*

(१४) *कति संस्काराः भवन्ति ?*

(१५) *ध्रुवसंज्ञकः वारः कः ?*

--००--